Lalitha Sahasranamam

Sanskrit · Devanagari source script · Latin rendering available

Part 1 · blocks 1–20

॥ श्री ललितामहात्रिपुरसुन्दर्यै नमः ॥

|| śrī lalitāmahātripurasundaryai namaḥ ||

श्री विद्यां जगतां धात्रीं सर्गस्स्थि लयेश्वरीम् ।

śrī vidyāṃ jagatāṃ dhātrīṃ sargassthi layeśvarīm |

नमामि ललितां नित्यां महात्रिपुरसुन्दरीम् ॥

namāmi lalitāṃ nityāṃ mahātripurasundarīm ||

अगस्त्य उवाच-

agastya uvāca-

अश्र्वानन महाबुद्धे सर्वशास्त्र विशारद ।

aśrvānana mahābuddhe sarvaśāstra viśārada |

कथितं ललितादेव्याश्चरितं परमाद्भुतम् ॥

kathitaṃ lalitādevyāścaritaṃ paramādbhutam ||

पूर्वं प्रादुर्भवो मातुस्ततः पट्टाभिषेचनम् ।

pūrvaṃ prādurbhavo mātustataḥ paṭṭābhiṣecanam |

भण्डासुरवधवैव विस्तरेण त्वयोदितः ॥

bhaṇḍāsuravadhavaiva vistareṇa tvayoditaḥ ||

वर्णितः श्रीपुरं चापि महाविभवविस्तरम् ।

varṇitaḥ śrīpuraṃ cāpi mahāvibhavavistaram |

श्रीमत्पञ्चदशाक्षर्या महिमा वर्णिस्तथा ।।

śrīmatpañcadaśākṣaryā mahimā varṇistathā ||

षोढान्यासादयो न्यासा न्यासखण्डे समीरिताः ।

ṣoḍhānyāsādayo nyāsā nyāsakhaṇḍe samīritāḥ |

अन्तर्यागक्रमश्चैव बहियार्गक्रमस्तथा ॥

antaryāgakramaścaiva bahiyārgakramastathā ||

महायागक्रमश्चैव पूजाखण्डे प्रकीर्तितः ।

mahāyāgakramaśvaiva pūjākhaṇḍe prakīrtitaḥ |

पुरश्चरखण्डे तु जपलक्षणमीरितम् ॥

puraśvarakhaṇḍe tu japalakṣaṇamīritam ||

होमखण्डे त्वया प्रोक्तो होमद्रव्यविधिक्रमः ।

homakhaṇḍe tvayā prokto homadravyavidhikramaḥ |

चक्रराजस्य विद्यायाः श्रीदेव्या देशिकात्मनोः ॥

cakrarājasya vidyāyāḥ śrīdevyā deśikātmanoḥ ||

रहस्यखण्डे तदात्म्य परस्परमुदीतिम् ।

rahasyakhaṇḍe tadātmya parasparamudītim |

स्तोत्रखण्डे बहुविधाः स्तुतयः परिकीर्तिताः ॥

stotrakhaṇḍe bahuvidhāḥ stutayaḥ parikīrtitāḥ ||

मन्त्रिणीदण्डिनीदेव्योः प्रोक्तो नामसहस्रके ।

mantriṇīdaṇḍinīdevyoḥ prokto nāmasahasrake |

न तु श्री ललितादेव्याः प्रोक्ते नामसहस्रकम् ॥

na tu śrī lalitādevyāḥ prokte nāmasahasrakam ||

तत्र मे संशयो जातो हयग्रीव दयानिधे ।

tatra me saṃśayo jāto hayagrīva dayānidhe |

किं वा त्वया विस्मृतं तज्ज्ञात्त्वा वा समुपेक्षितम् ॥

kiṃ vā tvayā vismṛtaṃ tajjñāttvā vā samupekṣitam ||

मम वा योग्यता नास्ति श्रोतुं नामसहस्रकम् ।

mama vā yogyatā nāsti śrotuṃ nāmasahasrakam |

किमर्थं भवता नोक्तं तत्र मे कारणं वद ॥
सूत उवाच-

kimarthaṃ bhavatā noktaṃ tatra me kāraṇaṃ vada ||
sūta uvāca-

इति पृष्टो हयग्रीवो मुनिना कुम्भजन्मना ।

iti pṛṣṭo hayagrīvo muninā kumbhajanmanā |

प्रहृष्टो वचनं प्राह तापसं कुम्भसंभवम् ॥

prahṣṭo vacanaṃ prāha tāpasaṃ kumbhasaṃbhavam ||

श्री हयग्रीव उवाच-

śrī hayagrīva uvāca-

ळोपामुद्रापतेऽगस्त्य सावधानमनाः शुणृः ।

ḷopāmudrāpate'gastya sāvadhānamanāḥ śuṇṛḥ |

नाम्नां सहस्र यन्नोक्तं कारणं तद्वदामि ते ॥

nāmnāṃ sahasra yannoktaṃ kāraṇaṃ tadvadāmi te ||

रहस्यमिति मत्वाऽहं नोक्तवास्ते न चान्यथा ।

rahasyamiti matvā'haṃ noktavāste na cānyathā |

पुन्श्च पृच्छते भक्त्या तस्मात्त्ते वदाम्यहम् ॥

punśca pṛcchate bhaktyā tasmāttte vadāmyaham ||

ब्रूयाच्छिष्याय भक्ताय रहस्यमपि देशिकः ।

brūyācchiṣyāya bhaktāya rahasyamapi deśikaḥ |

भवता न प्रदेयं स्यादभक्ताय कदाचन ॥

bhavatā na pradeyaṃ syādabhaktāya kadācana ||

न शठाय न दुष्टाय नाविश्वासाय कर्हिचित् ।

na śaṭhāya na duṣṭāya nāviśvāsāya karhicit |

श्रीमातृभक्तियुक्ताय श्रीविद्याराजवेदिने ॥

śrīmātṛbhaktiyuktāya śrīvidyārājavedine ||

उपासकाय शुद्धाय देयं नामसहस्रकम् ।

upāsakāya śuddhāya deyaṃ nāmasahasrakam |

यानि नाम सहस्रणानि सद्यः सिद्धिप्रदानि वै ॥

yāni nāma sahasraṇāni sadyaḥ siddhipradāni vai ||

तन्त्रेषु ललितादेव्यास्तुते मुख्यमिदं मुने ।

tantreṣu lalitādevyāstute mukhyamidaṃ mune |

श्रीविद्यैव तु मन्त्राणां तत्र कादिर्यथा परा ॥

śrīvidyaiva tu mantrāṇāṃ tatra kādiryathā parā ||

पुराणां श्रिरपुरमिव शक्तिनां ललिता यथा ।

purāṇāṃ śrirapuramiva śaktināṃ lalitā yathā |

Part 3 · blocks 41–60

श्रीविद्योपासकानां च यथा देवो परः शिवः ॥

śrīvidyopāsakānāṃ ca yathā devo paraḥ śivaḥ ||

तथा नाम सहस्रेषु वरमेतत् प्रकीर्तितम् ।

tathā nāma sahasreṣu varametat prakīrtitam |

यथाऽस्य पठनाद्देवी प्रीयते ललिताम्बिका ॥

yathā'sya paṭhanāddevī prīyate lalitāmbikā ||

अन्यनामसहस्रस्य पाठान्न प्रीयते तथा ।

anyanāmasahasrasya pāṭhānna prīyate tathā |

श्रीमातुः प्रीयते तस्माददिशं कीर्तयेदिद्म ॥

śrīmātuḥ prīyate tasmādadiśaṃ kīrtayedidma ||

बिल्वपत्रैश्चक्रराजे योऽर्चयेल्ललिताम्बिकाम् ।

bilvapatraiśvakrarāje yo'rcayellalitāmbikām |

पद्य्मैर्वा तुलसीपुष्पैरिभिर्नामसहस्रैः ॥

padymairvā tulasīpuṣpairibhirnāmasahasraiḥ ||

सद्यः प्रसादं कुरुते तस्य सिंहासनेश्वरी ।

sadyaḥ prasādaṃ kurute tasya siṃhāsaneśvarī |

चक्राधिराजमभ्यर्च्य जप्त्वा पञ्चदशाक्षरीम् ।।

cakrādhirājamabhyarcya japtvā pañcadaśākṣarīm ||

जपान्ते कीर्तियेन्नित्यमिदं नामसहस्रकम् ।

japānte kīrtiyennityamidaṃ nāmasahasrakam |

जपपूजाद्यशक्तश्रेत् पठेन्नामसहस्रम् ।।

japapūjādyaśaktaśret paṭhennāmasahasram ||

साङ्गर्चने साङ्गजपे यत्फलं तदवाप्नुयात् ।

sāṅgarcane sāṅgajape yatphalaṃ tadavāpnuyāt |

उपासने स्तुतीरन्या पठेदभ्युदयो हि सः ।।

upāsane stutīranyā paṭhedabhyudayo hi saḥ ||

इदं नामसहस्रं तु कीर्तियेन्नित्यकर्मवत् ।

idaṃ nāmasahasraṃ tu kīrtiyennityakarmavat |

चक्रराजार्चनं देव्या जपो नाम्नां च कीर्तिनम् ।।

cakrarājārcanaṃ devyā japo nāmnāṃ ca kīrtinam ||

भक्तस्य कृत्यमेतावदन्यदभ्युदयं विदुः ।

bhaktasya kṛtyametāvadanyadabhyudayaṃ viduḥ |

भक्तस्यावश्यकमिदं नामसहस्रकीर्तिनम् ।

bhaktasyāvaśyakamidaṃ nāmasahasrakīrtinam |

तत्र हेतुं प्रवक्ष्यामि शुणृ त्वं कुम्भसम्भव ।।

tatra hetuṃ pravakṣyāmi śuṇṛ tvaṃ kumbhasambhava ||

पुरा श्रीललितादेवी भक्तानां हितकाम्यया ।।

purā śrīlalitādevī bhaktānāṃ hitakāmyayā ||

वाग्देवीर्वशिनीमुख्याः समाहूयेदमब्रवीत ।

vāgdevīrvaśinīmukhyāḥ samāhūyedamabravīta |

Part 4 · blocks 61–80

वाग्देवता वशिन्याद्याः शुणृध्वं वचनं मम ।।

vāgdevatā vaśinyādyāḥ śuṇṛdhvaṃ vacanaṃ mama ||

भवत्यो मत्प्रसादेन प्रोल्लसद्वाग्विभूतयः ।

bhavatyo matprasādena prollasadvāgvibhūtayaḥ |

मद्भक्तानाम् वाग्विभूतिप्रदाने विनियाजिताः ।।

madbhaktānām vāgvibhūtipradāne viniyājitāḥ ||

मच्चक्रस्य रहस्यज्ञा मम नामपरायणाः ।

maccakrasya rahasyajñā mama nāmaparāyaṇāḥ |

मम स्तोत्रविधानाय तस्मादाज्ञापयामि वः ।।

mama stotravidhānāya tasmādājñāpayāmi vaḥ ||

कुरुध्वमंक्कितं स्तोत्रं मम नामसहस्रकैः ।

kurudhvamaṃkkitaṃ stotraṃ mama nāmasahasrakaiḥ |

येन भक्तैः स्तुताया मे सद्यः प्रीतिः परा भवेत् ।।

yena bhaktaiḥ stutāyā me sadyaḥ prītiḥ parā bhavet ||

हयग्रीव उवाच –

hayagrīva uvāca –

इत्याज्ञप्ता वचोदेव्यो देव्या श्रीललिताम्बया ।

ityājñaptā vacodevyo devyā śrīlalitāmbayā |

रहस्यैर्नामभिर्दिव्यैश्र्वकुः स्तोत्रमनित्तमम् ।।

rahasyairnāmabhirdivyaiśrvakuḥ stotramanittamam ||

रहस्यनामसाहस्रमिति तद्विश्रुतं परम् ।

rahasyanāmasāhasramiti tadviśrutaṃ param |

ततः कदाचित् सदसि स्थित्वा सिंहासनऽम्बिका ।।

tataḥ kadācit sadasi sthitvā siṃhāsana'mbikā ||

स्वसेवासरं प्रदात् सर्वेषां कुम्भसम्भव ।

svasevāsaraṃ pradāt sarveṣāṃ kumbhasambhava |

सेवार्थमागतास्तत्र ब्राह्माणी ब्रह्मकोटयः ।।

sevārthamāgatāstatra brāhmāṇī brahmakoṭayaḥ ||

लक्ष्मीनारायणानां च कोटयः समुपागताः ।

lakṣmīnārāyaṇānāṃ ca koṭayaḥ samupāgatāḥ |

गौरीकोटिसमेतानाम् रुद्राणां मपि कोटयः ।।

gaurīkoṭisametānām rudrāṇāṃ mapi koṭayaḥ ||

मन्त्रिणीदण्डिनीमुख्याः सेवार्थ याः समागताः ।

mantriṇīdaṇḍinīmukhyāḥ sevārtha yāḥ samāgatāḥ |

शक्तयो विविधाकारास्तासां संख्या न विद्यते ।।

śaktayo vividhākārāstāsāṃ saṃkhyā na vidyate ||

दिव्यौघा मानवौघाश्व सिद्धौघाश्व समागताः ।

divyaughā mānavaughāśva siddhaughāśva samāgatāḥ |

तत्र श्री ललितादेवी सर्वेषां दर्शनं ददौ ।।

tatra śrī lalitādevī sarveṣāṃ darśanaṃ dadau ||

Part 5 · blocks 81–100

तेषु दुष्टोपविष्टेषु स्वे स्वे स्थाने यथाक्रमम् ।

teṣu duṣṭopaviṣṭeṣu sve sve sthāne yathākramam |

ततः श्रीललितादेवीकटाक्षाक्षेपचोदिताः ।।

tataḥ śrīlalitādevīkaṭākṣākṣepacoditāḥ ||

उत्थाय वशिनीमुख्या बद्धाञ्जलिपुटास्तदा ।

utthāya vaśinīmukhyā baddhāñjalipuṭāstadā |

अस्तुवन्नामसाहस्रैः स्वकृतैर्ललिताम्बिकाम् ।।

astuvannāmasāhasraiḥ svakṛtairlalitāmbikām ||

श्रुत्वा स्तवं प्रसन्नाभूल्ललिता परमेश्वरी ।

śrutvā stavaṃ prasannābhūllalitā parameśvarī |

ते सर्वे विस्मयं जग्मुर्ये तत्र सदसि स्थिताः ।।

te sarve vismayaṃ jagmurye tatra sadasi sthitāḥ ||

ततः प्रोवाच ललिता सदस्यान् देवतागणान् ।

tataḥ provāca lalitā sadasyān devatāgaṇān |

ममाज्ञयैव वाग्देव्यश्च्क्रुः स्तोत्रमनुत्तमम् ।।

mamājñayaiva vāgdevyaśrvakruḥ stotramanuttamam ||

अंक्कितं नामभिर्दिव्यैर्मम प्रीतिविधायकैः ।

aṃkkitaṃ nāmabhirdivyairmama prītividhāyakaiḥ |

तत्पठध्वं सदा यूयं स्तोत्रं मत्प्रीतिवृद्धये ।।

tatpaṭhadhvaṃ sadā yūyaṃ stotraṃ matprītivṛddhaye ||

प्रवर्तयध्वं भक्तेषु मम नामसहस्रकम् ।

pravartayadhvaṃ bhakteṣu mama nāmasahasrakam |

इदं नामसहस्रं मे यो भक्तः पठते सकृत् ।।

idaṃ nāmasahasraṃ me yo bhaktaḥ paṭhate sakṛt ||

स मे प्रियतमो ज्ञेयस्तस्मै कामान् ददाम्यहम् ।

sa me priyatamo jñeyastasmai kāmān dadāmyaham |

श्रीचक्रे मां समभ्यर्च्य जप्त्वा पञ्चदशाक्षरीम् ।।

śrīcakre māṃ samabhyarcya japtvā pañcadaśākṣarīm ||

पश्चान्नामसहस्रं मे कीर्तियेन्मम तुष्टये ।

paścānnāmasahasraṃ me kīrtiyenmama tuṣṭaye |

मामर्चयतु वा मा वा विद्यां जपतु वा ना वा ।।

māmarcayatu vā mā vā vidyāṃ japatu vā nā vā ||

कीर्तियेन्नामसाहस्रमिदं मत्प्रीतये सदा ।

kīrtiyennāmasāhasramidaṃ matprītaye sadā |

मत्प्रीत्या सकलान् मे कीर्तयध्वं सदाऽऽदरात् ।

matprītyā sakalān me kīrtayadhvaṃ sadā''darāt |

हयग्रीव उवाच –

hayagrīva uvāca –

इति श्रीललितेशानी शास्ति देवान् सहानुगान् ।।

iti śrīlaliteśānī śāsti devān sahānugān ||

Part 6 · blocks 101–120

तदाज्ञया तदारभ्य ब्रह्मविष्णुमहेश्वराः ।

tadājñayā tadārabhya brahmaviṣṇumaheśvarāḥ |

शक्तयो मन्त्रिणीमुख्या इदं नामसहस्रकम् ।।

śaktayo mantriṇīmukhyā idaṃ nāmasahasrakam ||

पठन्ति भक्तया सततं ललितापरितुष्टये ।

paṭhanti bhaktayā satataṃ lalitāparituṣṭaye |

तस्मादवश्यं भक्तेन कीर्तिनीयमिदं मुने ।।

tasmādavaśyaṃ bhaktena kīrtinīyamidaṃ mune ||

आवश्यकत्वे हेतुस्ते मया प्रोक्तो मुनीश्वर ।

āvaśyakatve hetuste mayā prokto munīśvara |

इदानीं नामसाहस्रं वक्ष्यामि श्रद्धया शुणृ ।।

idānīṃ nāmasāhasraṃ vakṣyāmi śradvayā śuṇṛ ||

।। न्यासः ।।

|| nyāsaḥ ||

अस्य श्रीललितासहस्रनामस्तोत्रमाला मन्त्रस्य वशिन्यादि वाग्देवता ऋषयः ।
अनुष्टुप् छन्दः । श्रीललितापरमेश्वरी देवता । श्रीमद्वाग्भवकूटेति बीजम् ।
मध्यकूटेति शक्तिः । शक्तिकूटेतिकीलकम् ।
श्रीललितामहात्रिपुरसुन्दरी प्रसादसिद्धिद्वारा चिन्तित फलावाप्त्यर्थे जपे
विनियोगः । लमित्यादिञ्चपूजां कुर्यात् ।

asya śrīlalitāsahasranāmastotramālā mantrasya vaśinyādi vāgdevatā
ṛṣayaḥ |
anuṣṭup chandaḥ | śrīlalitāparameśvarī devatā | śrīmadvāgbhavakūṭeti
bījam |
madhyakūṭeti śaktiḥ | śaktikūṭetikīlakam |
śrīlalitāmahātripurasundarī prasādasiddhiddhārā cintita
phalāvāptyarthe jape viniyogaḥ | lamityādiñcapūjāṃ kuryāt |

।। ध्यानम् ।।

|| dhyānam ||

सिन्दूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुरत्

sindūrāruṇavigrahāṃ trinayanāṃ māṇikyamaulisphurat

तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहाम् ।

tārānāyakaśekharāṃ smitamukhīmāpīnavakṣoruhām |

पाणिभ्यामलिपूर्णरत्नचषकं रक्तोफळं बिभ्रतीं

pāṇibhyāmalipūrṇaratnacaṣakaṃ raktophaḻaṃ bibhratīṃ

सौम्या रत्नघटस्थरक्तचरणां ध्यायेत्पराम्बिकाम् ।।

saumyā ratnaghaṭastharaktacaraṇāṃ dhyāyetparāmbikām ||

श्री ललितासहस्रनामस्तोत्रम्

śrī lalitāsahasranāmastotram

ॐ श्रीमाता श्रीमहाराज्ञी श्रीमत्सिंहासनेश्वरी ।

oṃ śrīmātā śrīmahārājñī śrīmatsiṃhāsaneśvarī |

चिदग्नि – कुण्ड – सम्भूता- देवकार्य -समुद्यता ।।

cidagri – kuṇḍa – sambhūtā- devakārya -samudyatā ||

उद्भानु -सहस्राभा -चर्तुबाहू -समन्विता ।

udbhānu -sahasrābhā -cartubāhū -samanvitā |

रागस्वरुप –पाशाढ्या- क्रोधाकारांक्कुशोज्ज्वाळा ।।

rāgasvarupa –pāśāḍhyā- krodhākārāṃkkuśojjvāḻā ||

मनोरुपेक्षु -कोदण्डा -पञ्चतन्मात्र -सायका ।

manorupekṣu -kodaṇḍā -pañcatanmātra -sāyakā |

निजारुण -प्रभापूर -मज्जद्वह्याण्ड -मण्डला ।।

nijāruṇa -prabhāpūra -majjadvahyāṇḍa -maṇḍalā ||

Part 7 · blocks 121–140

चम्पकाशोक – पुन्नाग – सौगन्धिक –लसत्कचा ।

campakāśoka – punnāga – saugandhika –lasatkacā |

कुरुविन्द – मणि-श्रेणी – कनत्कोटीर – मण्डिता ।।

kuruvinda – maṇi-śreṇī – kanatkoṭīra – maṇḍitā ||

अष्टमीचन्द्र – विभ्राज – दलिकस्थल – शोभिता ।

aṣṭamīcandra – vibhrāja – dalikasthala – śobhitā |

मुखचन्द्र – कलंक्काभ – मृगनाभि – विशेषका ।।

mukhacandra – kalaṃkkābha – mṛganābhi – viśeṣakā ||

वदनस्मर – माङ्गळ्य – गृहतोरण – चिळ्लिका ।

vadanasmara – māṅgaḷya – gṛhatoraṇa – ciḻlikā |

वक्रलक्ष्मी – परिवाह- चलन्मीनाभ – लोचना ।।

vaktralakṣmī – parivāha- calanmīnābha – locanā ||

नवचम्पक – पुष्पाभ- नासादण्ड – विराजिता ।

navacampaka – puṣpābha- nāsādaṇḍa – virājitā |

ताराकान्ति- तिरस्कारि – नासाभरण-भासुरा ।।

tārākānti- tiraskāri – nāsābharaṇa-bhāsurā ||

कदम्बमञ्जरी – क्लृप्त-कर्णपूर-मनोहरा ।

kadambamañjarī – klṛpta-karṇapūra-manoharā |

ताटङ्क – युगली-भूत – तपनोडुप – मण्डला ।।

tāṭaṅka – yugalī-bhūta – tapanoḍupa – maṇḍalā ||

पद्म्मरागशिलादर्श – परिभावि – कपोलभूः ।

padymarāgaśilādarśa – paribhāvi – kapolabhūḥ |

नवविद्रुम – बिम्बश्री – न्यक्कारि – रदनच्छदा ।।

navavidruma – bimbaśrī – nyakkāri – radanacchadā ||

शुद्धविद्यांकुराकार – द्विजपंक्ति – द्वयोज्ज्वला ।

śuddhavidyāṃkurākāra – dvijapaṃkti – dvayojjvalā |

कर्पूरवीटिकामोद – समाकर्ष-द्विगन्तरा ।।

karpūravīṭikāmoda – samākarṣa-dvigantarā ||

निज – सळ्लाप – माधुर्य – विनर्भिर्त्सित – कच्छपी ।

nija – saḻḻāpa – mādhurya – vinarbhirtsita – kacchapī |

मन्दस्मित – प्रभापूर – मज्ज्तकामेश – मानसा ।।

mandasmita – prabhāpūra – majjtakāmeśa – mānasā ||

अनाकालित – सादृश्य – चुबुकश्री – विराजिता ।

anākālita – sādṛśya – cubukaśrī – virājitā |

कामेश – बद्ध-माङ्ग्ल्य-सूत्र-शोभित – कन्धरा ।।

kāmeśa – baddha-māṅglya-sūtra-śobhita – kandharā ||

कनकाङ्ग्द – केयूर – कमनीय – भुजानविता ।

kanakāṅgda – keyūra – kamanīya – bhujānavitā |

रत्नग्रैवेय – चिन्ताक – लोल- मुक्ता- फलान्विता ।।

ratnagraiveya – cintāka – lola- muktā- phalānvitā ||

Part 8 · blocks 141–160

कामेश्वर – प्रेमरत्न-मणि – प्रतिपण – स्तनी ।

kāmeśvara – premaratna-maṇi – pratipaṇa – stanī |

न्याभ्यालवाल – रोमालि – लता-फल-कुचद्वयी ।।

nyābhyālavāla – romāli – latā-phala-kucadvayī ||

लक्ष्यरोम - लताधारता – समुन्नेय – मध्यमा ।।

lakṣyaroma - latādhāratā – samunneya – madhyamā ||

स्तनभार – दलन्मध्य – पट्टबन्ध – वलित्रया ।।

stanabhāra – dalanmadhya – paṭṭabandha – valitrayā ||

अरुणारुणकौसुम्भ – वस्त्र – भास्वत् – कटीतटी ।

aruṇāruṇakausumbha – vastra – bhāsvat – kaṭītaṭī |

रत्न – किङ्किणिका – रम्य – रशना – दाम – भूषिता ।।

ratna – kiṅkiṇikā – ramya – raśanā – dāma – bhūṣitā ||

कामेश – ज्ञात – सौभाग्य – मार्दुवोरु – द्वयान्विता ।

kāmeśa – jñāta – saubhāgya – mārduvoru – dvayānvitā |

माण्यिकामुकुटाकार – जानुद्वय – विराजिता ।।

māṇyikāmukuṭākāra – jānudvaya – virājitā ||

इन्द्रगोप – परिक्षिप्तस्मरणतूनाभ – जंघिका ।

indragopa – parikṣiptasmaraṇatūnābha – jaṃghikā |

गूढगुळ्फा – कूर्मपृष्ठ- ययिष्णु – प्रपदान्विता ।।

gūḍhaguḷphā – kūrmapṛṣṭha- yayiṣṇu – prapadānvitā ||

नख – दीधित – संछन्न – नमज्जन – तमोगुणा ।

nakha – dīdhita – saṃchanna – namajjana – tamoguṇā |

पदद्वय – प्रभाजाल – पराकृत – सरोरुहा ।।

padadvaya – prabhājāla – parākṛta – saroruhā ||

सिञ्जान – मणिमञ्जीर मण्डित – श्री-पदाम्बुजा ।

siñjāna – maṇimañjīra maṇḍita – śrī-padāmbujā |

मराली-मन्दगमना – महालावण्य – शेवधिः ।।

marālī-mandagamanā – mahālāvaṇya – śevadhiḥ ||

सर्वारुणाऽनवद्यांगी – सर्वाभरण – भूषिता ।

sarvāruṇā'navadyāṃgī – sarvābharaṇa – bhūṣitā |

शिव कामेश्वराङ्कस्था – शिवा स्वाधीन – वल्लभा ।।

śiva kāmeśvarāṅkasthā – śivā svādhīna – vallabhā ||

सुमेरु – मध्य – शृङ्गत्था – श्रीमन्नगर- नायिका ।

sumeru – madhya – śṛṅgatthā – śrīmannagara- nāyikā |

चिन्तामणि गृहान्तस्था पञ्च-ब्रह्मासन – स्थिता ।।

cintāmaṇi gṛhāntasthā pañca-brahmāsana – sthitā ||

महापद्माटवी – संस्था कदम्बवन – वासिनी ।

mahāpadymāṭavī – saṃsthā kadambavana – vāsinī |

सुधासागर – मध्यस्था कामाक्षी कामदायिनी ।।

sudhāsāgara – madhyasthā kāmākṣī kāmadāyinī ||

Part 9 · blocks 161–180

देवर्षि- गण- संघात – स्तूयमानात्म – वैभवा ।

devarṣi- gaṇa- saṃghāta – stūyamānātma – vaibhavā |

भण्डासुर – वधोद्युक्त – शक्तिसेना – समान्विता ।।

bhaṇḍāsura – vadhodyukta – śaktisenā – samānvitā ||

सम्पत्करी – समारुढ – सिन्धुर – वज्र – सेविता ।

sampatkarī – samāruḍha – sindhura – vajra – sevitā |

अश्र्वारुढाधिष्ठिताश्र – कोटि – कोटिभि – रावृता ।।

aśrvāruḍhādhiṣṭhitāśra – koṭi – koṭibhi – rāvṛtā ||

चक्रराज – रथारुढ – सर्वायुध – परिष्कृता ।

cakrarāja – rathāruḍha – sarvāyudha – pariṣkṛtā |

गेयचक्र – रथारुढ – मंत्रिणी – परिसेविता ।।

geyacakra – rathāruḍha – maṃtriṇī – parisevitā ||

किरिचक्र – रथारुढ – दण्डनाथा – पुरस्कृता ।

kiricakra – rathāruḍha – daṇḍanāthā – puraskṛtā |

ज्वालामालिनिकाक्षिप्त – मह्निप्राकार – मध्यगा ।।

jvālāmālinikākṣipta – mahniprākāra – madhyagā ||

भण्डसैन्य – वधोयुक्त – शक्ति – विक्रम – हर्षिता ।

bhaṇḍasainya – vadhoyukta – śakti – vikrama – harṣitā |

नित्या – पराक्रमाटोप – निरीक्षण- समुत्सुका ।।

nityā – parākramāṭopa – nirīkṣaṇa- samutsukā ||

भण्डपुत्र – वधोद्युक्त – बाला – विक्रम – नन्दिता ।

bhaṇḍaputra – vadhodyukta – bālā – vikrama – nanditā |

मन्त्रिण्यम्बा – विरचित – विषङ्ग – वध – तोषिता ।।

mantriṇyambā – viracita – viṣaṅga – vadha – toṣitā ||

विशुक्र – प्राणहरण – वाराही – वीर्य- नन्दिता ।

viśukra – prāṇaharaṇa – vārāhī – vīrya- nanditā |

कामेश्वर – मुखालोक – कल्पित – श्रीगणेश्वरा ।।

kāmeśvara – mukhāloka – kalpita – śrīgaṇeśvarā ||

महागणेश – निभिन्न – विघ्नयन्त्र – प्रहर्षिता ।

mahāgaṇeśa – nibhinna – vighnayantra – praharṣitā |

भण्डासुरेन्द्र – निर्मुक्त – शस्त्र – प्रयस्र – वर्षिणी

bhaṇḍāsurendra – nirmukta – śastra – prayasra – varṣiṇī

कराङ्गुलि – नखोत्पन्न – नारायण-दशाकृतिः ।

karāṅguli – nakhotpanna – nārāyaṇa-daśākṛtiḥ |

महा – पाशुपतास्राग्नि-निर्दग्धासुर – सैनिका ।।

mahā – pāśupatāsrāgri-nirdagdhāsura – sainikā ||

कामेश्वरास्र – निर्दग्ध – सभण्डासुर – शून्यका ।

kāmeśvarāsra – nirdagdha – sabhaṇḍāsura – śūnyakā |

ब्रह्मोपेन्द्र – महेन्द्रादि – देव – संस्तुत – वैभवा ।।

brahmopendra – mahendrādi – deva – saṃstuta – vaibhavā ||

Part 10 · blocks 181–200

हर- नेत्राग्नि – संदग्ध – काम – सञ्जीवनौषधिः ।

hara- netrāgri – saṃdagdha – kāma – sañjīvanauṣadhiḥ |

श्रीमद्वाग्भव – कूटैक – स्वरुप – मुख – पंक्कजा ।।

śrīmadvāgbhava – kūṭaika – svarupa – mukha – paṃkkajā ||

कण्ठाधः – कटि – पर्यन्त – मध्यकूट – स्वरुपिणी ।

kaṇṭhādhaḥ – kaṭi – paryanta – madhyakūṭa – svarupiṇī |

शक्तिकूटैकतापन्न – कट्यधोभाग – धारिणी ।।

śaktikūṭaikatāpanna – kaṭyadhobhāga – dhāriṇī ||

मूलमन्त्रात्मिका मूलकूटत्रय – कलेवरा ।

mūlamantrātmikā mūlakūṭatraya – kalevarā |

कुलामृतैक – रसिका – कुलसंकेत – पालिनी ।।

kulāmṛtaika – rasikā – kulasaṃketa – pālinī ||

कुलाङ्गना कुलान्तस्था कौलिनी कुलयोगिनी ।

kulāṅganā kulāntasthā kaulinī kulayoginī |

अकुला समयान्तरस्था समयाचार – तत्परा ।।

akulā samayāntarasthā samayācāra – tatparā ||

मूलाधारैक – निलया ब्रह्माग्रन्थि – विभेदिनी ।

mūlādhāraika – nilayā brahmāgranthi – vibhedinī |

मणिपूरान्तरुदिता विष्णुग्रन्थि विभेदनी ।।

maṇipūrāntaruditā viṣṇugranthi vibhedanī ||

आज्ञाचक्रकान्तरालस्था रुद्रग्रन्थि – विभेदनी ।

ājñācakrakāntarālasthā rudragranthi – vibhedanī |

सहस्राम्बुजारुढा सुधासाराभिवर्षिणी ।।

sahasrāmbujāruḍhā sudhāsārābhivarṣiṇī ||

तडिलता समरुचिऋ षट्चक्रोपरि – संस्थिता ।

taḍilatā samarucir̥ ṣaṭcakropari – saṃsthitā |

महाशक्तिः कुण्डलिनी बिसतन्तु – तनीयसी ।।

mahāśaktiḥ kuṇḍalinī bisatantu – tanīyasī ||

भवानी भावनागम्या भवारण्य – कुठारिका ।

bhavānī bhāvanāgamyā bhavāraṇya – kuṭhārikā |

भद्रप्रिया भद्रमूर्ति – भक्त- सौभाग्यदायिनी ।।

bhadrapriyā bhadramūrti – bhakta- saubhāgyadāyinī ||

भक्तिप्रिया भक्तिगम्या भक्तिवश्या भयापहा ।

bhaktipriyā bhaktigamyā bhaktivaśyā bhayāpahā |

शाम्भवी शारदाराध्या शर्वाणी शर्मदायिनी ।।

śāmbhavī śāradārādhyā śarvāṇī śarmadāyinī ||

शाक्करी श्रीकरी साध्वी शरचन्द्र – निभानना ।

śākkarī śrīkarī sādhvī śaracandra – nibhānanā |

शातोदरी शान्तिमती निराधारा निरञ्जना ।।

śātodarī śāntimatī nirādhārā nirañjanā ||

निर्लेपा निर्मला नित्या निराकारा निराकुला ।

nirlepā nirmalā nityā nirākārā nirākulā |

निर्गुणा निष्कला शान्ता निष्कामा निरुपप्लवा ।।

nirguṇā niṣkalā śāntā niṣkāmā nirupaplavā ||

नित्यमुक्ता निर्विकारा निष्प्रपञ्चा निराश्रया ।

nityamuktā nirvikārā niṣprapañjā nirāśrayā |

नित्यशुद्धा नित्यबुद्धा निरवद्या निरन्तरा ।।

nityaśuddhā nityabuddhā niravadyā nirantarā ||

निष्कारणा निष्कलङ्का निरुपाधि – र्निरीश्वरा ।

niṣkāraṇā niṣkalaṅkā nirupādhi – rnirīśvarā |

नीरागा रागथनी निर्मदा मदनाशिनी ।।

nīrāgā rāgathanī nirmadā madanāśinī ||

निश्चिन्ता निरहङ्कारा निर्मोहा मोहनाशिनी ।

niśrintā nirahaṅkārā nirmohā mohanāśinī |

निमर्मा ममताहन्त्री निष्पापा पापनाशिनी ।।

nimarmā mamatāhantrī niṣpāpā pāpanāśinī ||

निष्क्रोधा क्रोधशमनी निर्लोभा लोभनाषिनी ।

niṣkrodhā krodhaśamanī nirlobhā lobhanāṣinī |

निःसंशया संशयघ्नी निर्भवा भवनाषिनी ।।

niḥsaṃśayā saṃśayaghnī nirbhavā bhavanāṣinī ||

निर्विकल्पा निराबाधा निर्भेदा भेदनाशिनी ।

nirvikalpā nirābādhā nirbhedā bhedanāśinī |

निर्नाशा मृत्युमथनी निष्क्रिया निष्परिग्रहा ।।

nirnāśā mṛtyumathanī niṣkriyā niṣparigrahā ||

निस्तुला नीलचिकुरा निरपाया निरत्यया ।

nistulā nīlacikurā nirapāyā niratyayā |

दुर्लभा दुर्गमा दुर्गा दुःखहन्त्री सुखप्रदा ।।

durlabhā durgamā durgā duḥkhahantrī sukhapradā ||

दुष्टदूरा दुराचारशमनी दोष-वर्जिता ।

duṣṭadūrā durācāraśamanī doṣa-varjitā |

सर्वज्ञा सान्द्रकरुणा समानाधिक – वर्जिता ।।

sarvajñā sāndrakaruṇā samānādhika – varjitā ||

सर्वशक्तिमयी सर्वमाङ्ग्ला सद्गति – प्रदा ।

sarvaśaktimayī sarvamāṅglā sadgati – pradā |

सर्वेश्वरी सर्वमयी सर्वमन्त्र सर्वरुपिणी ।।

sarveśvarī sarvamayī sarvamantra sarvarupiṇī ||

सर्व – यन्त्रात्मिका सर्व – तन्त्ररुपा मनोन्मनी ।

sarva – yantrātmikā sarva – tantrarupā manonmanī |

माहेश्वरी महादेवी महालक्ष्मी – मृडप्रिया ।।

māheśvarī mahādevī mahālakṣmī – mṛḍapriyā ||

Part 12 · blocks 221–240

महारुपा महापूज्या महा – पातक-नाशिनी ।

mahārupā mahāpūjyā mahā – pātaka-nāśinī |

महामाया महासत्वा महाशक्ति – र्मकारतिः ।।

mahāmāyā mahāsatvā mahāśakti – rmakāratiḥ ||

महाभोगा महैश्वर्या महावीर्या महाबला ।

mahābhogā mahaiśvaryā mahāvīryā mahābalā |

महाबुद्धि – महासिद्धि – र्महायोगेश्वरेश्वरी ।।

mahābuddhi – mahāsiddhi – rmahāyogeśvareśvarī ||

महातन्त्रा – महामन्त्रा महायन्त्रा महासना ।

mahātantrā – mahāmantrā mahāyantrā mahāsanā |

महायाग – महाक्रमाराध्या – महाभैरव – पूजिता ।

mahāyāga – mahākramārādhyā – mahābhairava – pūjitā |

महेश्वर – महाकल्प –महाताण्डव – साक्षिणी ।

maheśvara – mahākalpa –mahātāṇḍava – sākṣiṇī |

महाकामेश – महिषी महारात्रिपुरसुन्दरी ।।

mahākāmeśa – mahiṣī mahārātripurasundarī ||

चतुष्टषष्ट्युपचाराढ्या चतुष्टषष्टकलामयी ।

catuṣṭaṣaṣṭyupacārāḍhyā catuṣṭaṣaṣṭakalāmayī |

महाचतुःषष्टकोटि –योगिनी – गणसेवीता ।।

mahācatuḥṣaṣṭakoṭi –yoginī – gaṇasevītā ||

मनुविद्या चन्द्रविद्या चन्द्रमण्डल मध्यगा ।

manuvidyā candravidyā candramaṇḍala madhyagā |

चारुरुपा चारुहासा चारुचन्द्र – कलाधरा ।।

cārurupā cāruhāsā cārucandra – kalādharā ||

चराचर – जगन्नाथा चक्ररात – निकेतना ।

carācara – jagannāthā cakrarāta – niketanā |

पार्वती पद्य्मनयना पद्य्मराग – समप्रभा ।।

pārvatī padymanayanā padymarāga – samaprabhā ||

पञ्चप्रेतासनासीना पञ्चब्रब्मस्वरुपिणी ।

pañcapretāsanāsīnā pañcabrabmasvarupiṇī |

चिरमयी परमानन्दा विज्ञानज्ञनस्वरुपिणी ।।

ciramayī paramānandā vijñānajñanasvarupiṇī ||

ध्यान – ध्यातृ – ध्येयरुपा धर्माधर्मविवर्जिता ।

dhyāna – dhyātṛ – dhyeyarupā dharmādharmavivarjitā |

विश्वरुपा जागरणी स्वपन्ती तैजसात्मिका ।।

viśvarupā jāgaraṇī svapantī taijasātmikā ||

सुप्ता प्राज्ञात्मिका तुर्या सर्वावस्था – विवर्जिता ।

suptā prājñātmikā turyā sarvāvasthā – vivarjitā |

सृष्टिकर्त्री ब्रह्मरुपा गोप्त्री गोविन्दरुपिणी ।।

sṛṣṭikartrī brahmarupā goptrī govindarupiṇī ||

Part 13 · blocks 241–260

संहारिणी रुद्ररुपा तिरोधानकरीश्वरी ।

saṃhāriṇī rudrarupā tirodhānakarīśvarī |

सदाशिवाऽनुग्रहदा पञ्चकृत्यपरायणा ।।

sadāśivā'nugrahadā pañcakṛtyaparāyaṇā ||

भानुमण्डल – मध्यस्था भैरवी भगमालिनी ।

bhānumaṇḍala – madhyasthā bhairavī bhagamālinī |

पद्य्मासना भगवती पद्य्मनाभ – सहोदरी ।।

padymāsanā bhagavatī padymanābha – sahodarī ||

उन्मेष – निमिषोत्पन्न – विपन्न – भुवनावलिः ।

unmeṣa – nimiṣotpanna – vipanna – bhuvanāvaliḥ |

सहस्रशीर्षवदना सहस्राक्षी सहस्रपात् ।।

sahasraśīrṣavadanā sahasrākṣī sahasrapāt ||

आब्रह्मकीटजननी वर्णाश्रम विधायनी ।

ābrahmakīṭajananī varṇāśrama vidhāyanī |

निजाज्ञारुप – निगमा पुण्यापुण्य – फलप्रदा ।।

nijājñārupa – nigamā puṇyāpuṇya – phalapradā ||

श्रुति सिमन्त सिन्दुरी – कृत – पादाब्जधूलिका ।

śruti simanta sindurī – kṛta – pādābjadhūlikā |

सकलागम सन्दोह – सूक्ति – सम्पुट – मौक्तिका ।।

sakalāgama sandoha – sūkti – samputa – mauktikā ||

पुरुषार्थ प्रदा पूर्णा भोगिनी भुवनेश्वरी ।

puruṣārtha pradā pūrṇā bhoginī bhuvaneśvarī |

अम्बिकाऽनादि – निधना हरिब्रह्मेनदु सेविता ।।

ambikā'nādi – nidhanā haribrahmenadu sevitā ||

नारायणी नादरुपा नामरुप – विवर्जिता ।

nārāyaṇī nādarupā nāmarupa – vivarjitā |

ह्रीं कारी ह्रीमती ह्रया हेयोपादेय वर्जिता ।।

hrīṃ kārī hrīmatī hrayā heyopādeya varjitā ||

राजराजार्चिता राज्ञी रम्या राजीव लोचना ।

rājarājārcitā rājñī ramyā rājīva locanā |

रञ्जनी रमणी रस्या रणत्किङ्किणी – मेखला ।।

rañjanī ramaṇī rasyā raṇatkiṅkiṇī – mekhalā ||

रमा राकेन्दु – वदना रतिरुपा रतिप्रिया ।

ramā rākendu – vadanā ratirupā ratipriyā |

रक्षाकरी राक्षसघ्नी रामा रमणलम्पटा ।।

rakṣākarī rākṣasaghnī rāmā ramaṇalampaṭā ||

काम्या कामकलारुपा कदम्ब-कुसुम-प्रिया ।

kāmyā kāmakalārupā kadamba-kusuma-priyā |

कल्याणी जगती – कन्दा करुणा रस सागरा ।।

kalyāṇī jagatī – kandā karuṇā rasa sāgarā ||

Part 14 · blocks 261–280

कलावती कलालापा कान्ता कादम्बरी – प्रिया ।

kalāvatī kalālāpā kāntā kādambarī – priyā |

वरदा वामनयना वारुणी – मद – विह्वला ।।

varadā vāmanayanā vāruṇī – mada – vihvalā ||

विश्वाशिका वेदवेद्या विन्ध्याचल – निवासनी ।

viśvāśikā vedavedyā vindhyācala – nivāsanī |

विधात्री वेदजननी विष्णुमाया विलासनी ।।

vidhātrī vedajananī viṣṇumāyā vilāsanī ||

क्षेत्रस्वरुपा क्षेत्रेशी क्षेत्र – क्षेत्र्यज्ञ – पालिनी ।

kṣetrasvarupā kṣetreśī kṣetra – kṣetryajña – pālinī |

क्षयवृद्धि – विर्निमुक्ता क्षेत्रपाल – समर्जिता ।।

kṣayavṛddhi – virnimuktā kṣetrapāla – samarjitā ||

विजया विमला वन्ध्या वन्दारु –जन-वत्सला ।

vijayā vimalā vandhyā vandāru –jana-vatsalā |

वाग्वादिनी वामकेशी वह्निमण्डल वासिनी ।।

vāgvādinī vāmakeśī vahmimaṇḍala vāsinī ||

भक्तिमय कल्पलतिका पशुपाश – विमोचनी ।

bhaktimaya kalpalatikā paśupāśa – vimocanī |

संहृताशेष – पाषण्डा सदाचार – प्रवर्तिका ।।

saṃhratāśeṣa – pāṣaṇḍā sadācāra – pravartikā ||

तापत्रयाग्नि – सन्तप्त – समाह्लदन – चन्द्रिका ।

tāpatrayāgri – santapta – samāhvadana – candrikā |

तरुणी तापसा राध्या तनुमध्या तमोऽपहा ।।

taruṇī tāpasā rādhyā tanumadhyā tamo'pahā ||

चिति – स्ततपद – लक्ष्यार्थी चिदेकरस – रुपिणी ।

citi – statapada – lakṣyārthī cidekarasa – rupiṇī |

स्वात्मानन्द लयाभूत – ब्रह्माद्यानन्द – सन्तति ।।

svātmānanda layābhūta – brahmādyānanda – santati ||

परा प्रत्यक चित्तरुपा पश्यन्ती परदेवता ।

parā pratyaka cittarupā paśyantī paradevatā |

मध्यमा वैखरी रुपा भक्तृमानस – हंसिका ।।

madhyamā vaikharī rupā bhaktṛmānasa – haṃsikā ||

कामेश्वर – प्राणनाडी कृतज्ञा कामपूजिता ।

kāmeśvara – prāṇanāḍī kṛtajñā kāmapūjitā |

श्रृंगार रस- सम्पूर्णा जया जालन्धर स्थिता ।।

śrṛṃgāra rasa- sampūrṇā jayā jālandhara sthitā ||

ओड्यपाण-पीठ – विलया बिन्दु – माण्डलवासिनी ।

oḍyapāṇa-pīṭha – vilayā bindu – māṇḍalavāsinī |

रहायोग – क्रमाराध्या रहस्तपर्ण – तर्पिता ।।

rahāyoga – kramārādhyā rahastaparṇa – tarpitā ||

Part 15 · blocks 281–300

सद्यः प्रसादिनी विश्वसाक्षिणी साक्षिवर्जिता ।

sadyaḥ prasādinī viśvasākṣiṇī sākṣivarjitā |

षडङ्गदेवता – युक्ता षाड्गुण्य – परिपूरिता ।।

ṣaḍaṅgadevatā – yuktā ṣāḍguṇya – paripūritā ||

नित्या – क्लिन्ना निरुपमा निर्वाण सुख दायिनी ।

nityā – klinnā nirupamā nirvāṇa sukha dāyinī |

नित्याषोडशिका – रुपा श्रीकण्ठार्ध – शरीरिणी ।।

nityāṣoḍaśikā – rupā śrīkaṇṭhārdha – śarīriṇī ||

प्रभावती प्रभारुपा प्रसिद्धा परमेश्वरी ।

prabhāvatī prabhārupā prasiddhā parameśvarī |

मूलप्रकृति – रव्यक्ता व्यक्ताव्यक्त – स्वरुपिणी ।।

mūlaprakṛti – ravyaktā vyaktāvyakta – svarupiṇī ||

व्यापिनी विविधाकारा विद्याऽविद्या – स्वरुपिणी ।

vyāpinī vividhākārā vidyā'vidyā – svarupiṇī |

महाकामेश नयन-कुमुदाह्लाद – कौमुदी ।।

mahākāmeśa nayana-kumudāhvāda – kaumudī ||

'भक्त –हार्द – तमो – भेद – मद्भानु संततिः ।

'bhakta –hārda – tamo – bheda – madbhānu saṃtatiḥ |

शिवदूती शिवराध्या शिवमूर्तिः शिवक्करि ।।

śivadūtī śivarādhyā śivamūrtiḥ śivakkari ||

शिवप्रिया शिवपरा शिष्टेष्टा शिष्टपूजिता ।

śivapriyā śivaparā śiṣṭeṣṭā śiṣṭapūjitā |

अप्रमेया स्वप्रकाशा मनो-वाचामगोचरा ।।

aprameyā svaprakāśā mano-vācāmagocarā ||

च्छिछक्ति – श्चेतना – रुपा जडशक्ति – र्जडात्मिका ।

cchichakti – ścetanā – rupā jaḍaśakti – rjaḍātmikā |

गायत्री – व्याह्रती संध्या द्विजबृन्द – निषेविता ।।

gāyatrī – vyāhratī saṃdhyā dvijabṛnda – niṣevitā ||

तत्वासना तत्तवमयी पञ्चकोशान्तर – स्थिता ।

tatvāsanā tattavamayī pañcakośāntara – sthitā |

निःसीम – महिमा नित्य – यौवना मदशालिनी ।।

niḥsīma – mahimā nitya – yauvanā madaśālinī ||

मद्घूर्णित रक्ताक्षी मदपाट्ल-गण्डभूः ।

madghūrṇita raktākṣī madapāṭla-gaṇḍabhūḥ |

चन्दन – द्रव – दिग्धाङ्गी चाम्पेय –कुसुम – प्रिया ।।

candana – drava – digdhāṅkī cāmpeya –kusuma – priyā ||

कुशला कोमलाकारा कुरुकुल्ला कुलेश्वरी ।

kuśalā komalākārā kurukullā kuleśvarī |

कुलकुण्डलया कौलमार्ग – तत्पर – सेविता ।।

kulakuṇḍalayā kaulamārga – tatpara – sevitā ||

Part 16 · blocks 301–320

कुमार – गणनाशाम्बा तुष्टिः पुष्टि-र्मति-धृतिः ।

kumāra – gaṇanāśāmbā tuṣṭiḥ puṣṭi-rmati-dhṛtiḥ |

शान्तिः स्वस्तिमयी कान्ति-र्नन्दिनी विघ्ननाशिनी ।।

śāntiḥ svastimayī kānti-rnandinī vighnanāśinī ||

तेजोवती त्रिनयना लोलाक्षी – कामरुपिणी ।

tejovatī trinayanā lolākṣī – kāmarupiṇī |

मालिनी हंसिनी माता मलयाचल – वासिनी ।।

mālinī haṃsinī mātā malayācala – vāsinī ||

सुमुखी नलिनी सुभ्रूः शोभना सुरनायिका ।

sumukhī nalinī subhrūḥ śobhanā suranāyikā |

कालकण्ठी कान्तिमयी क्षोभिणी सूक्ष्मरुपिणी ।।

kālakaṇṭhī kāntimayī kṣobhiṇī sūkṣmarupiṇī ||

वज्रेश्वरी वामदेवी वयोवस्था – विवर्जिता ।

vajreśvarī vāmadevī vayovasthā – vivarjitā |

सिद्धेश्वरी सिद्धविद्या सिद्धमाता यशस्वनी ।।

siddheśvarī siddhavidyā siddhamātā yaśasvanī ||

विशुद्धि – चक्र – निलया - ऽऽरक्तवर्णा त्रिलोचना ।

viśuddhi – cakra – nilayā - "raktavarṇā trilocanā |

खट्वाङ्गदि – प्रहरणा वदवैक – समन्विता ।।

khaṭvāṅgadi – praharaṇā vadavaika – samanvitā ||

पायसान्न प्रिया त्वकस्था पशुलोक भयंक्करी ।

pāyasānna priyā tvakasthā paśuloka bhayaṃkkarī |

अमृतादि – महाशक्ति –संवृता डाकिनीश्वरी ।।

amṛtādi – mahāśakti –saṃvṛtā ḍākinīśvarī ||

अनाहताब्ज – निलया श्यामाभा वदनद्वया ।

anāhātābja – nilayā śyāmābhā vadanadvayā |

दंष्ट्रोज्ज्वलाक्षमालादि – धरा रुधिर – संस्थिता ।।

daṃṣṭrojjvalākṣamālādi – dharā rudhira – saṃsthitā ||

कालरात्र्यादि – शक्त्यौघ – वृता स्निग्धौदन – प्रिया ।

kālarātryādi – śaktyaugha – vṛtā sngidhaudana – priyā |

महावीरेन्द्र वरदा राकिण्यम्बा – स्वरुपिणी ।।

mahāvīrendra varadā rākiṇyambā – svarupiṇī ||

मणिपूराब्ज निलया वदहत्रय – संयुता ।

maṇipūrābja nilayā vadahatraya – saṃyutā |

वज्राधिकायुधोपेता डामर्यादिभि – रावृता ।।

vajrādhikāyudhopetā ḍāmaryādibhi – rāvṛtā ||

रक्तिवर्णा मांसनिष्ठा गुडान्न – प्रीत – मानसा ।

raktivarṇā māṃsaniṣṭhā guḍānna – prīta – mānasā |

समस्तभक्त – सुखदा लाकिन्यम्बा – स्वरुपिणी ।।

samastabhakta – sukhadā lākinyambā – svarupiṇī ||

Part 17 · blocks 321–340

स्वाधिष्ठानाम्बुजकता चर्तुवक्त्र – मनोहरा ।

svādhiṣṭhānāmbujakatā cartuvaktra – manoharā |

शूलाद्यायुद्ध – सम्पन्ना पीतवर्णाऽतिगर्विता ।।

śūlādyāyuddha – sampannā pītavarṇā'tigarvitā ||

मेदो निष्ठा मधुप्रीता बन्धिन्यादि – समन्विता ।

medo niṣṭhā madhuprītā bandhinyādi – samanvitā |

दध्यन्नासक्त – ह्रदया काकिनी – रुप – धारिणी ।।

dadhyannāsakta – hradayā kākinī – rupa – dhāriṇī ||

मूलाधाराम्बुजारुढा पञ्चवक्त्रास्थि – संस्थिता ।

mūlādhārāmbujāruḍhā pañcavaktrāsthi – saṃsthitā |

अङ्कुशादि –प्रहरणा वरदादि – निषेविता ।।

aṅkuśādi –praharaṇā varadādi – niṣevitā ||

मुद्गौदनासक्त – चित्ता साकिन्यम्बा – स्वरुपिणी ।

mudgaudanāsakta – cittā sākinyambā – svarupiṇī |

आज्ञा – चक्राब्ज – निलया शुक्लवर्णा षडानना ।।

ājñā – cakrābja – nilayā śuklavarṇā ṣaḍānanā ||

मज्जा – संस्था हंसवती – मुख्य – शक्ति – समान्विता ।

majjā – saṃsthā haṃsavatī – mukhya – śakti – samānvitā |

हरिद्रान्नैक – रसिका हाकिनी – रुप – धारिणी ।।

haridrānnaika – rasikā hākinī – rupa – dhāriṇī ||

सहस्रदल – पद्‍म्मस्था सर्व – वर्णोप – शोभिता ।

sahasradala – padymasthā sarva – varṇopa – śobhitā |

सर्वायुध – धरा शुक्ल – संस्थिता सर्वतोमुखी ।।

sarvāyudha – dharā śukla – saṃsthitā sarvatomukhī ||

सर्वौदन- प्रीतचित्ता याकिन्यम्बा – स्वरुपिणी ।

sarvaudana- prītacittā yākinyambā – svarupiṇī |

स्वाहा स्वधाऽमति – र्मेधा श्रुति- स्मृति- रन्नुमत्ता ।।

svāhā svadhā'mati – rmedhā śruti- smṛti- rannumattā ||

पुण्यकीर्तिः पुण्यलभ्या पुण्यश्रवण – कीर्तिना ।

puṇyakīrtiḥ puṇyalabhyā puṇyaśravaṇa – kīrtinā |

पुलोमजार्चिता बन्धमोचनी बन्धुरालका ।।

pulomajārcitā bandhamocanī bandhurālakā ||

विमर्शरुपिणी विद्या वियदादि – जगत्प्रसूः ।

vimarśarupiṇī vidyā viyadādi – jagatprasūḥ |

सर्वव्याधि – प्रशमनी सर्वमृत्यु – निवारणी ।।

sarvavyādhi – praśamanī sarvamṛtyu – nivāraṇī ||

अग्रगण्या - ऽचिन्त्यरुपा कलिकल्मष – नाशिनी ।

agragaṇyā - 'cintyarupā kalikalmaṣa – nāśinī |

कात्यायनी कालहन्त्री कमलाक्ष – निषेविता ।।

kātyāyanī kālahantrī kamalākṣa – niṣevitā ||

ताम्बूल – पूरित – मुखी दाडिमी –कुसुम – प्रभा ।

tāmbūla – pūrita – mukhī dāḍimī –kusuma – prabhā |

मृगाक्षी मोहिनी मुख्या मृडानी मित्ररुपिणी ।।

mṛgākṣī mohinī mukhyā mṛḍānī mitrarupiṇī ||

नित्य – तृप्ता भक्तिनिधि – र्नियन्त्री निखिलेश्वरी ।

nitya – tṛptā bhaktinidhi – rniyantrī nikhileśvarī |

मैत्र्यादि – वासनालभ्या महा-प्रलय-साक्षिणी ।।

maitryādi – vāsanālabhyā mahā-pralaya-sākṣiṇī ||

पराशक्तिः परानिष्ठा प्रज्ञानघन – रुपिणी ।

parāśaktiḥ parāniṣṭhā prajñānaghana – rupiṇī |

माध्वीपानालसा मत्ता मातृका – वर्ण-रुपिणी ।।

mādhvīpānālasā mattā mātṛkā – varṇa-rupiṇī ||

महाकैलास-निलया – मृणाल-मृदु-दोर्लता ।

mahākailāsa-nilayā – mṛṇāla-mṛdu-dorlatā |

महनीया दयामूर्ति – र्महासाम्राज्य-शालिनी ।।

mahanīyā dayāmūrti – rmahāsāmrājya-śālinī ||

आत्मविद्या महाविद्या श्रीविद्या कामसेविता ।

ātmavidyā mahāvidyā śrīvidyā kāmasevitā |

श्रीषोडाशाक्षरीविद्या त्रिकुटा कामकोटिका ।।

śrīṣoḍāśākṣarīvidyā trikuṭā kāmakoṭikā ||

कटाक्ष – किंक्करी-भूत – कमला – कोटि – सेविता ।

kaṭākṣa – kiṃkkarī-bhūta – kamalā – koṭi – sevitā |

शिरःस्थिता चन्द्रनिभा भालस्थेन्द्रु – धनुः प्रभा ।।

śiraḥsthitā candranibhā bhālasthendru – dhanuḥ prabhā ||

ह्दयास्था रविप्रख्या त्रिकोणान्तर – दीपिका ।

hdayāsthā raviprakhyā trikoṇāntara – dīpikā |

दाक्षायणी दैन्त्यहन्त्री दक्षयज्ञविनाशनी ।।

dākṣāyaṇī daintyahantrī dakṣayajñavināśanī ||

दरान्दोलित दीर्घाक्षी दरहासोज्ज्वलमुखी ।

darāndolita dīrghākṣī darahāsojjvalamukhī |

गुरु-मूर्ति-गुण-निधि-र्गोमाता गुहजन्म – भूः ।।

guru-mūrti-guṇa-nidhi-rgomātā guhajanma – bhūḥ ||

देवेशी दण्डनीतिस्था दहराकाश – रुपिणी ।

deveśī daṇḍanītisthā daharākāśa – rupiṇī |

प्रतिपन्मुख्य – राकान्त –तिथि-मण्डल – पूजिता ।।

pratipanmukhya – rākānta –tithi-maṇḍala – pūjitā ||

कलात्मिका कलानाथा काव्यालाप – विनोदनी ।

kalātmikā kalānāthā kāvyālāpa – vinodanī |

सचामर – रमा – वाणी – सव्य – दक्षिण – सेविता ।।

sacāmara – ramā – vāṇī – savya – dakṣiṇa – sevitā ||

Part 19 · blocks 361–380

आदिशक्ति - रमेयाऽऽत्मा परमा पावनाकृतिः ।

ādiśakti - rameyā''tmā paramā pāvanākṛtiḥ |

अनेक –कोटि-ब्रह्माण्ड-जननी दिव्य-विग्रहा ।।

aneka –koṭi-brahmāṇḍa-jananī divya-vigrahā ||

क्लीं कारी केवला गुह्या कैवल्य-पद-दायिनी ।

klīṃ kārī kevalā guhyā kaivalya-pada-dāyinī |

त्रिपुरा त्रिजगद्वन्द्या त्रिमूर्ति-स्त्रिदशेश्वरी ।

tripurā trijagadvandyā trimūrti-sridaśeśvarī |

त्र्यक्षरी दिव्य – गन्धाढ्या सिन्दुर-तिलकाञ्जिता ।

tryakṣarī divya – gandhāḍhyā sindura-tilakāñjitā |

उमा शैलेन्द्रतनया गौरी गन्धर्व – सेविता ।।

umā śailendratanayā gaurī gandharva – sevitā ||

विश्वगर्भा स्वर्णगर्भा - ऽवरदा वागधीश्वरी ।

viśvagarbhā svarṇagarbhā - 'varadā vāgadhīśvarī |

ध्यानगम्या - ऽपरिच्छेद्या ज्ञानदा ज्ञानविग्रहा ।।

dhyānagamyā - 'paricchedyā jñānadā jñānavigrahā ||

सर्व-वेदान्त-सम्यवेद्या सत्यानन्द स्वरुपिणी ।

sarva-vedānta-samyavedyā satyānanda svarupiṇī |

लोपामुदार्चिता लीलाक्लृप्त – ब्रह्माण्ड-मण्डला ।।

lopāmudārcitā līlāklṛpta – brahmāṇḍa-maṇḍalā ||

अदृश्या दृश्यरहिता विज्ञात्री वैद्य-वर्जिता ।

adṛśyā dṛśyarahitā vijñātrī vaidya-varjitā |

योगिनी योगदा योग्या योगानन्दा युगन्धरा ।।

yoginī yogadā yogyā yogānandā yugandharā ||

इच्छाशक्ति-ज्ञानशक्ति-क्रियाशक्ति-स्वरुपिणी ।

icchāśakti-jñānaśakti-kriyāśakti-svarupiṇī |

सर्वाधारा सुप्रतिष्ठा सदसद्रूप धारिणी ।।

sarvādhārā supratiṣṭhā sadasadrūpa dhāriṇī ||

अष्टमूर्ति – रजाजैत्री लोकयात्रा विधायिनी ।

aṣṭamūrti – rajājaitrī lokayātrā vidhāyinī |

एकाकिनी भूमरुपा निर्द्वैता – द्वैतवर्जिता ।।

ekākinī bhūmarupā nirdvaitā – dvaitavarjitā ||

अन्नदा वसुदा वृद्धा ब्रह्मात्मैक्य – स्वरुपिणी ।

annadā vasudā vṛdvā brahmātmaikya – svarupiṇī |

बृहती ब्राह्मणी ब्राह्मी ब्रह्मानन्दा बलिप्रिया ।।

bṛhatī brāhmaṇī brāhmī brahmānandā balipriyā ||

भाषारुपा बृहत्सेना भावाभाव – विवर्जिता ।

bhāṣārupā bṛhatsenā bhāvābhāva – vivarjitā |

सुखाराध्या शुभकरी शोभनासुलभागतिः ।।

sukhārādhyā śubhakarī śobhanāsulabhāgatiḥ ||

Part 20 · blocks 381–400

राजराजेश्वरी राज्यदायिनी राज्यवल्लभा ।

rājarājeśvarī rājyadāyinī rājyavallabhā |

राजत्कृपा राजपीठ – निवेशित-निजाश्रिता ।।

rājatkṛpā rājapīṭha – niveśita-nijāśritā ||

राज्यलक्ष्मीः कोशनाथा चतुपङ्ग – बलेश्वरी ।

rājyalakṣmīḥ kośanāthā catupaṅga – baleśvarī |

साम्राज्य – दायिनी सत्यसन्धा सागरमेखला ।।

sāmrājya – dāyinī satyasandhā sāgaramekhalā ||

दीक्षिता दैत्यशमनी सर्वलोकवशंक्करी ।

dīkṣitā daityaśamanī sarvalokavaśaṃkkarī |

सर्वार्थदात्री सावित्री सच्चिदानन्द- रुपिणी ।।

sarvārthadātrī sāvitrī saccidānanda- rupiṇī ||

देशकालापरिच्छिन्ना सर्वगा सर्वमोहिनी ।

deśakālāparicchinnā sarvagā sarvamohinī |

सरस्वती शास्रमयी गुहाम्बा गुह्यारुपिणी ।।

sarasvatī śāsramayī guhāmbā guhyārupiṇī ||

सर्वोपाधि – विर्निमुक्ता सदाशिव – पतिव्रता ।

sarvopādhi – virnimuktā sadāśiva – pativratā |

सम्प्रदायेश्वरी साध्वी गुरुमण्डल – रुपिणी ।।

sampradāyeśvarī sādhvī gurumaṇḍala – rupiṇī ||

कुलोत्तीर्णा भगाराध्या माया मधुमती मही ।

kulottīrṇā bhagārādhyā māyā madhumatī mahī |

गणाम्बा गुह्यकाराध्या कोमलांगी गुरुप्रिया ।।

gaṇāmbā guhyakārādhyā komalāṃgī gurupriyā ||

स्वतन्त्रा सर्वतन्त्रेशी दक्षिणामूर्ति – रुपिणी ।

svatantrā sarvatantreśī dakṣiṇāmūrti – rupiṇī |

सनकादि – समाराध्या शिवज्ञान – प्रदायिनी ।।

sanakādi – samārādhyā śivajñāna – pradāyinī ||

चित्कलाऽऽनन्द – कलिका प्रेमरुपा प्रियंक्करी ।

citkalā"nanda – kalikā premarupā priyaṃkkarī |

नामपारायण – प्रीता नन्दिविद्या नटेश्वरी ।।

nāmapārāyaṇa – prītā nandividyā naṭeśvarī ||

मिथ्या – जगदधिष्ठाना मुक्तिदा मुक्तिरुपिणी ।

mithyā – jagadadhiṣṭhānā muktidā muktirupiṇī |

लास्यप्रिया लयकरी लज्जा रम्भादिवन्दिता ।।

lāsyapriyā layakarī lajjā rambhādivanditā ||

भवदाव – सुधावृष्टिः पापारण्य – दवानला ।

bhavadāva – sudhāvṛṣṭiḥ pāpāraṇya – davānalā |

दौर्भाग्य – तूलवातुला जराध्वान्तरविप्रभा ।।

daurbhāgya – tūlavātulā jarādhvāntaraviprabhā ||

Part 21 · blocks 401–420

भाग्याब्धि – चन्द्रिका भक्त-चित्त-केकि-घनाघना ।

bhāgyābdhi – candrikā bhakta-citta-keki-ghanāghanā |

रोगपर्वत – दम्भोलि-र्मृत्युदारु-कुठारिका ।।

rogaparvata – dambholi-rmṛtyudāru-kuṭhārikā ||

महेश्वरी महाकाली महाग्रासा महाशना ।

maheśvarī mahākālī mahāgrāsā mahāśanā |

अपर्णा चण्डिका चण्डमुण्डासुर – निषूदनी ।।

aparṇā caṇḍikā caṇḍamuṇḍāsura – niṣūdanī ||

क्षराक्षरात्मिका सर्वलोकेशी विश्वधारिणी ।

kṣarākṣarātmikā sarvalokeśī viśvadhāriṇī |

त्रिवर्गदात्री सुभगा त्र्यम्बका त्रिगुणात्मिका ।।

trivargadātrī subhagā tryambakā triguṇātmikā ||

स्वर्गापवर्गदा शुद्धा जपापुष्प – निभाकृतिः ।

svargāpavargadā śuddhā japāpuṣpa – nibhākṛtiḥ |

ओजोवती द्युतिधरा यज्ञरुपा प्रियव्रता ।।

ojovatī dyutidharā yajñarupā priyavratā ||

दुराराध्या दुराधर्षा पाटली – कुसुम-प्रिया ।

durārādhyā durādharṣā pāṭalī – kusuma-priyā |

महती मेरुनिलया मन्दार-कुसुम-प्रिया ।।

mahatī merunilayā mandāra-kusuma-priyā ||

वीराराध्या विराड्रूपा विरजा विश्वतोमुखी ।

vīrārādhyā virāḍrupā virajā viśvatomukhī |

प्रत्यग् – रुपा पराकाशा प्राणदा प्राणरुपिणी ।।

pratyag – rupā parākāśā prāṇadā prāṇarupiṇī ||

मार्ताण्ड – भैरवाराध्या मन्त्रिणी-न्यस्त-राज्यधूः ।

mārtāṇḍa – bhairavārādhyā mantriṇī-nyasta-rājyadhūḥ |

त्रिपुरेशी जयत्सेना निस्त्रैगुण्या परापरा ।।

tripureśī jayatsenā nisraiguṇyā parāparā ||

सत्यज्ञानान्द – रुपा सामरस्य – परायणा ।

satyajñānānda – rupā sāmarasya – parāyaṇā |

कपर्दिनी कलामाला कामधु-क्काम-रुपिणी ।।

kapardinī kalāmālā kāmadhu-kkāma-rupiṇī ||

कलानिधिः काव्यकला रसज्ञा रसशेवधिः ।

kalānidhiḥ kāvyakalā rasajñā rasaśevadhiḥ |

पुष्टा पुरातना पूज्या पुष्करा पुष्करेक्षणा ।।

puṣṭā purātanā pūjyā puṣkarā puṣkarekṣaṇā ||

परञ्ज्योतिः परन्धाम परमाणुः परात्परा ।

parañjyotiḥ parandhāma paramāṇuḥ parātparā |

पाशहत्सा पाशहन्त्री परमन्त्र – विभेदनी ।।

pāśahatsā pāśahantrī paramantra – vibhedanī ||

Part 22 · blocks 421–440

मूर्ताऽमूर्ता नित्यतृप्ता मुनिमानस – हंसिका ।

mūrtā'mūrtā nityatṛptā munimānasa – haṃsikā |

सत्यव्रता सत्यरुपा सर्वान्तर्यामिनी सती ।।

satyavratā satyarupā sarvāntaryāminī satī ||

ब्रह्माणी ब्रह्मजननी बहुरुपा बुधार्चिता ।

brahmāṇī brahmajananī bahurupā budhārcitā |

प्रसवित्री प्रचण्डाऽऽज्ञा प्रतिष्ठा प्रकटाकृतिः ।।

prasavitrī pracaṇḍā''jñā pratiṣṭhā prakaṭākṛtiḥ ||

प्राणेश्वरी प्राणदात्री पञ्चाशत्पीठ – रुपिणी ।

prāṇeśvarī prāṇadātrī pañcāśatpīṭha – rupiṇī |

विश्रृंखला विवित्तस्था वीरमाता वियत्सप्रसुः ।।

viśvṛṃkhalā vivittasthā vīramātā viyatsaprasuḥ ||

मुकुन्दा मक्तिनिलया मूलविग्रह-रुपिणी ।

mukundā maktinilayā mūlavigraha-rupiṇī |

भावज्ञा भवरोगघ्नी भवचक्र-प्रवर्तिनी ।।

bhāvajñā bhavarogaghnī bhavacakra-pravartinī ||

छन्दः सारा शास्रसारा मन्त्रसारा तलोदरी ।

chandaḥ sārā śāsrasārā mantrasārā talodarī |

उदारकीर्ति – रुद्दामवैभवा वर्णरुपिणी ।।

udārakīrti – ruddāmavaibhavā varṇarupiṇī ||

जन्ममृत्यु – जरातप्त-जन-विश्रांति-दायिनी ।

janmamṛtyu – jarātapta-jana-viśrāṃti-dāyinī |

सर्वोप्निष-दुद्घुष्टा शान्त्यतीत – कलात्मिका ।।

sarvopniṣa-dudghuṣṭā śāntyatīta – kalātmikā ||

गम्भीरा गगनान्तस्था गर्विता गानलोलुपा ।

gambhīrā gaganāntasthā garvitā gānalolupā |

कल्पना – रहिता काष्ठाऽकान्ता कान्तार्ध – विग्रहा ।।

kalpanā – rahitā kāṣṭhā'kāntā kāntārdha – vigrahā ||

कार्यकारण – निर्मुक्ता कामकेलि – तरङ्गिता ।

kāryakāraṇa – nirmuktā kāmakeli – taraṅgitā |

कनत्कनक –ताटंक्का लीला-विग्रह-धारिणी ।।

kanatkanaka –tāṭaṃkkā līlā-vigraha-dhāriṇī ||

अजा क्षयविर्निर्मुक्ता मुग्धा क्षिप्र-प्रसादिनी ।

ajā kṣayavirnirmuktā mugdhā kṣipra-prasādinī |

अन्तर्मुख – समाराध्या बहिर्मुख – सुदुर्लभा ।।

antarmukha – samārādhyā bahirmukha – sudurlabhā ||

त्रयी त्रिवर्ग- निलया त्रिस्था त्रिपुर – मालिनी ।

trayī trivarga- nilayā tristhā tripura – mālinī |

निरामया निरालम्बा स्वात्मारामा सुधासृतिः ।।

nirāmayā nirālambā svātmārāmā sudhāsṛtiḥ ||

Part 23 · blocks 441–460

संसारपङ्क – निमर्ग्र – समुद्धरण – पण्डिता ।

saṃsārapaṅka – nimargra – samuddharaṇa – paṇḍitā |

यज्ञप्रिया यज्ञकर्त्री यजमान – स्वरुपिणी ।।

yajñapriyā yajñakartrī yajamāna – svarupiṇī ||

धर्माधारा धनाध्यक्षा धनधान्य – विवार्धिनी ।

dharmādhārā dhanādhyakṣā dhanadhānya – vivārdhinī |

विप्रप्रिया विप्ररुपा विश्वभ्रमण – कारिणी ।।

viprapriyā viprarupā viśvabhramaṇa – kāriṇī ||

विश्वग्रासा विद्रुमाभा वैष्णवी विष्णुरुपिणी ।

viśvagrāsā vidrumābhā vaiṣṇavī viṣṇurupiṇī |

अयोनि –र्योनि-निलया कूटस्था कुलरुपिणी ।।

ayoni –ryoni-nilayā kūṭasthā kularupiṇī ||

वीरगोष्ठी – प्रिया वीरा नैष्कर्म्या नादरुपिणी ।

vīragoṣṭhī – priyā vīrā naiṣkarmyā nādarupiṇī |

विज्ञानकलना कल्या विदग्धा बैन्दवासना ।।

vijñānakalanā kalyā vidagdhā baindavāsanā ||

तत्तवाधिका तत्वमयी त्तत्वमर्थ – स्वरुपिणी ।

tattavādhikā tatvamayī ttatvamartha – svarupiṇī |

सामगन – प्रिया सोम्या सदाशिव – कुटुम्बिनी ।।

sāmagana – priyā somyā sadāśiva – kuṭumbinī ||

सव्यापसव्य – मार्गस्था सर्वापद्धिनिवारिणी ।

savyāpasavya – mārgasthā sarvāpaddhinivāriṇī |

स्वस्था स्वभावमधुरा धीरा धीरसमर्चिता ।।

svasthā svabhāvamadhurā dhīrā dhīrasamarcitā ||

चैतन्यार्ध्य – समाराध्या चैतन्य-कुसुम-प्रिया ।

caitanyārdhya – samārādhyā caitanya-kusuma-priyā |

सदोदिता सदातुष्टा तरुणादित्य – पाटला ।।

sadoditā sadātuṣṭā taruṇāditya – pāṭalā ||

दक्षिणा – दक्षिणाराध्या दरस्मेर-मुखाम्बुजा ।

dakṣiṇā – dakṣiṇārādhyā darasmera-mukhāmbujā |

कौलिनी - केवऽनर्घ्य – कैवल्य-पद-दायिनी ।।

kaulinī - keva'narghya – kaivalya-pada-dāyinī ||

स्तोत्र-प्रिया स्तुतिमती श्रुति-संस्तुत-वैभवा ।

stotra-priyā stutimatī śruti-saṃstuta-vaibhavā |

मन्स्विनी मानवती महेशी मंङ्गलाकृतिः ।।

mansvinī mānavatī maheśī maṃṅglākṛtiḥ ||

विश्वमाता जगद्धात्री विशालाक्षी विरागिणी ।

viśvamātā jagaddhātrī viśālākṣī virāgiṇī |

प्रगल्भा परमोदारा परामोदा मनोमयी ।।

pragalbhā paramodārā parāmodā manomayī ||

Part 24 · blocks 461–480

व्योमकेशी विमानस्था वज्रिणी वामकेश्वरी ।

vyomakeśī vimānasthā vajriṇī vāmakeśvarī |

पञ्चयज्ञ प्रिया पञ्चप्रेत-मञ्चाधिशायिनी ।।

pañcayajña priyā pañcapreta-mañcādhiśāyinī ||

पञ्चमी पञ्चभूतेशी पञ्चसंख्योपचारिणी ।

pañcamī pañcabhūteśī pañcasaṃkhyopacāriṇī |

शाश्वती शाश्वतैश्वर्या शर्मदा शम्भुमोहिनी ।।

śāśvatī śāśvataiśvaryā śarmadā śambhumohinī ||

धरा धरसुता धन्या धर्मिणी धर्मवर्धिनी ।

dharā dharasutā dhanyā dharmiṇī dharmavardhinī |

लोकातीता गुणातीता सर्वातीता शमात्मिका ।।

lokātītā guṇātītā sarvātītā śamātmikā ||

बन्धुक-कुसुम-प्रख्या बाला लीला-विनोदिनी ।

bandhuka-kusuma-prakhyā bālā līlā-vinodinī |

सुमङ्गली सुखकरी सवेषाढ्या सुवासिनी ।।

sumaṅgalī sukhakarī saveṣāḍhyā suvāsinī ||

सुवासिन्यर्चन-प्रीताऽऽशोभना शुद्ध-मानसा ।।

suvāsinyarcana-prītā''śobhanā śuddha-mānasā ||

बिन्दु-तर्पण-सन्तुष्टा पूर्वजा त्रिपुराम्बिका ।।

bindu-tarpaṇa-santuṣṭā pūrvajā tripurāmbikā ||

दशमुद्रा-समाराध्या त्रिपुराश्रीवशंक्करी ।

daśamudrā-samārādhyā tripurāśrīvaśaṃkkarī |

ज्ञानमुद्रा ज्ञानगम्या ज्ञान-ज्ञेय-स्वरुपिणी ।।

jñānamudrā jñānagamyā jñāna-jñeya-svarupiṇī ||

योनिमुद्रा त्रिखण्डेशी त्रिगुणाम्बा त्रिकोणगा ।

yonimudrā trikhaṇḍeśī triguṇāmbā trikoṇagā |

अनघाऽद्भुत- चारिता वाञ्छितार्थ – प्रदायिनी ।।

anaghā'dbhuta- cāritā vāñchitārtha – pradāyinī ||

अभ्यासातिशय – ज्ञाता षडध्वातीत – रुपिणी ।

abhyāsātiśaya – jñātā ṣaḍadhvātīta – rupiṇī |

अव्याज-करुणा-मूर्ति-रज्ञान-ध्वान्त-दीपिका ।।

avyāja-karuṇā-mūrti-rajñāna-dhvānta-dīpikā ||

आबाल – गोप-विदिता सर्वानुल्लंघ्य-शासना ।

ābāla – gopa-viditā sarvānullaṃghya-śāsanā |

श्रीचक्रराज निलया श्रीमत्-त्रिपुरसुन्दरी ।।

śrīcakrarāja nilayā śrīmat-tripurasundarī ||

श्री शिवा शिव –शक्त्यैक्य-रुपिणी ललिताम्बिका ।

śrī śivā śiva –śaktyaikya-rupiṇī lalitāmbikā |

एवं श्रीललितादेव्या नाम्नां साहस्रकं जगुः ।।

evaṃ śrīlalitādevyā nāmnāṃ sāhasrakaṃ jaguḥ ||

।।इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे श्रीहयग्रीवागस्त्य-संवादे

||iti śrībrahmāṇḍapurāṇe uttarakhaṇḍe śrīhayagrīvāgastya-saṃvāde

श्री ललितासहस्रनाम-स्तोत्रं सम्पूर्णम् ।।

śrī lalitāsahasranāma-stotraṃ sampūrṇam ||

Source & edition

Both complete selected source poem blocks are included: introductory dialogue and the names hymn through its colophon. This edition does not supply an additional separate phalashruti. Spellings retained; no English translation is supplied.

Sanskrit Wikisource contributors (transcription); classical composition attribution recorded separately. श्री ललितासहस्रनामस्तोत्रम्, revision 38076. CC BY-SA 4.0.

The source spellings are retained. Reading blocks and the Latin rendering help you follow the text; these adaptations are also CC BY-SA4.0.

Edition ws-38076-566efd38f5.